हि सौम्य ! मन” इति श्रुतिः विवरणं कोशशब्दे । अन्नप्रकृतमुच्यतेऽस्मिन् “तत् प्रकृतवचने” पा० मयट् । अन्नप्रचुरे यज्ञादौ “अन्नमयोयज्ञ” इति सि०कौ० ।

**अन्नमल** न०पु० अन्नस्य मलः किट्टः । निस्सारितरसभागभेदे (मिटि) इति ख्यातेऽन्नकिट्टे “वर्चस्कः मल” इति सि० कौ० । सुरायाञ्च “सुरा वै मलमन्नानां पुरीषं मलमुच्यते । तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति” प्रा०वि० स्मृतिः ।

**अन्नरस** पु० अन्नस्य रसः सारांशः स्वादो वा । भुक्तस्य अन्नस्य सारांशे “सवा अयं पुरुषोऽन्नरस” इति श्रुतिः अपथ्यैः सह संभुङ्क्ते व्याधिरन्नरसे यथेति” वै० । रसस्तु जठरानलेनान्नस्य परिपाकात् कश्चित् सारांशः । अन्नपाकशब्दे तद्विवरणम् । अन्नस्यास्वादे च ।

**अन्नविकार** पु० अन्नस्य विकारः । शोणितादिषु सप्तसु धातुषु “प्रधानेन व्यपदेशाभवन्तीति” न्यायात् चरमधातावेवास्य प्रयोगोपाधित्वात् चरमे धातौ शुक्रे रा०नि० । शुक्रोत्पत्त्यर्थमेव हि क्रमशःशोणितादिपाकात्तस्य प्राधान्यम् । अत एव “अन्नाद्रेत” इति श्रुतौ अन्नतो रेतस उत्पत्तिर्दर्शिता सा च परम्परयैव ।

**अन्नाद** त्रि० अन्नमत्तुं शक्नोति अद–अण् उप० । अन्नभोजनसामर्थ्यवति दीप्ताग्नौ । “अन्नवानन्नादोभवति य एवं विद्वानिति छा०उप० । ‘अन्नादः दीप्ताग्निरिति” शा०भा० । “त्विषिमानपचितिमान् यशस्वी ब्रह्मवर्चस्यन्नाद” इति कात्या० ३,३,५ । अन्नभक्षके त्रि० “टिड्ढाणञित्यादि” पा० सूत्रे आद्यन्तयोस्तद्धितसाहचर्यात् तद्धिताणन्तादेव ङीप् अन्यतोन, तेनातः स्त्रियां टाप् ।

**अन्नादिन्** त्रि०अन्नमत्ति अद्-णिनि ६त० । अन्नभक्षके । “भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रतीति” मनुः स्त्रियां ङीप् ।

**अन्नाद्य** न० अन्नरूपमाद्यं भक्ष्यम् । अन्नरूपभक्ष्ये । “अग्निमन्नादमन्नाद्यायादधे”य०३,५, । अन्नमाद्यं यस्य । अन्नप्रभृतौ त्रि०“अन्नाद्याय व्यूहध्वं सोमोराजा यमागमदिति” दन्तधावनमन्त्रः । “अन्नाद्येनोदकेन वा” इति मनुः ।

**अन्नायुस्** त्रि० अन्नमायुर्जीवनसाधनमस्य । अन्नजीवने “स एषोऽन्नस्य यद्ध्येयद्वायुरन्नायुर्वा एष यद्वायुरिति” ऐ० उप० । अन्नायुरन्ननिबन्धनायुरन्नजीवन इत्यर्थः ।

**अन्नावृध** त्रि० अन्नं वर्द्धतेऽनेन वृध–करणे क्विप् ६त० पूर्व्वपददीर्घः । अन्नवर्द्धके । “अत उत्वा पितुभृतोजनित्रीरन्नावृधं प्रतिचरन्त्यन्नैरिति ऋ० १०,१,४, ।

**अन्नाशन** न० अन्नस्य विधानेन आशनम् । अन्नप्राशनार्थे ।

**अन्य** त्रि० अन–अघ्न्यादि० य । भिन्ने, सदृशे च । “उह्यितं द्दृशेऽन्यच्च कवस्थेभ्यो न किञ्चनेति” रघुः । “शरीरेण समं नाशं सर्वमन्यद्धि गच्छति” हितो० । “अन्यदुच्छृङ्खलं सत्वमन्यच्छास्त्रनियन्त्रितमिति” माघः धन्यास्ताः गुणरत्नरोहणभुवोधन्यास्तदन्यैव सेति” सा०द० सदृशे अन्योक्तिः मुख्यत्वेऽस्य सर्वनामता । “नान्वये सति सर्व्वस्वं यज्ञान्यस्मै प्रतिश्रुतमिति” या० । “व्याप्तिः साध्यवदन्यस्मिन्निति” भाषा० । ‘इन्द्रश्चन्येषां या शतक्रतोरिति ऋ० ८,२३,१४, अन्यस्मिन् यूपे, निदधाति रेत इति ऋ० ३,५५,१७ । छन्दसेऽन्यस्य न तत्कार्यम्, ‘साध्वन्यानां सखिद्विषे” इति मु०बो० जसि तु वा साध्वन्ये–साध्वन्याः । तस्येदमित्यर्थे छ दुक् । अन्यदीयः ।

**अन्यकारुक** प्र० अन्यत् करोति कृ–उण् स्वार्थे कन् कारुकः । पुरीषकिट्टे द्वारा० । अन्यस्य कारके त्रि० ।

**अन्यचित्त** न० अन्यदिव स्वव्यापराक्षमं चित्तं कर्म्म० । विषयालोचनासमर्थे चित्ते । ६त० । अन्यमनस्के त्रि० ।

**अन्यत्** अव्य० । अन–बा० यति । अन्यार्थे । “देवदत्तोगच्छति अन्यच्च यज्ञदत्त” इति गण० मह्वो० स्वरादिपाठादव्ययत्वम् ।

**अन्यतम** त्रि० अन्य+डतमइति, मुग्धबोधम् । बहूनां मध्ये निर्द्धारिते एकस्मिन् । न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदवति तच्च तद्भिन्नत्वे सति तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वम् । यथा घटपटगृहान्यतम इत्यादौ घटादिभेदत्रयभेदो घटपटगृहेष्वेव, तद्भिन्नेषु सर्वत्र तत्त्रयभेदसत्त्वात् । अनेकत्वञ्च अपेक्षाबोधविषयत्वं तथा च यावन्तः पदार्थाः अन्यतमघटकप्रथमभेदप्रतियोगितया विवक्षितास्तावन्तएव भेदा ग्राह्यास्तथा च तावत्पदार्थभिन्नभेदवत्त्वमेवान्यतमशब्दार्थः । “अन्यतरान्यतमशब्दौ अव्युत्पन्नौ प्रातिपदिके इति” कैयटः । तेनान्यतमस्य न सर्वनामकार्य्यम् ‘किंयत्तदोनिर्द्धारणे इति” पा० किंयत्तद्भ्योऽन्यत्र डतरादिविधानाभावाच्च डतमान्तत्वम् अतोऽव्युत्पन्नत्वम् । इति भा०प्र०उ० । अतएव सर्वनामसंज्ञासूत्रे डतरडतमान्तयोरुक्तत्वेऽपि अन्यतरशब्दस्य पृथग्ग्रहणम् । “कर्म्मादिष्वन्यतमत्वं कारकत्वमिति” सारमञ्जरी “अधःप्रकुपितोऽन्यतमो हि दोष” इति सुश्रुतम् ।

**अन्यतर** त्रि० अन्य+डतर मु०बो० । द्वयोर्मध्ये निर्द्धारिते एकस्मिन् । न्यायमते भेदद्वयादिच्छिन्नप्रतियोगिताकभेदवति